कस्मान् न भवति ? नैतदस्ति। विहिता हि [1]तत्र करणादिसञ्ज्ञा। तदर्थमाह–अपूर्वविधौ इति। ब्रुविशासिगुणेन च यत् सचते। ब्रुविशास्योर्गुणः[2] साधनं, प्रधानं कर्म, धर्मादिकम्, तेन [3]यत् सम्बध्यते, तदकीर्तितमाचरितं कविना, तदकथितमुक्तं सूत्रकारेण। दुहि–गां दोग्धि पयः। याचि–पौरवं गां याचते। रुधि–गामवरुणद्धि व्रजम्। प्रच्छि–माणवकं पन्थानं पृच्छति। भिक्षि–पौरवं गां भिक्षते। चिञ्–वृक्षमवचिनोति फलानि। ब्रुवि–माणवकं धर्मं ब्रूते। शासि–माणवकं धर्ममनुशास्ति॥

## गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ। (५२/५४०)

अर्थशब्दः प्रत्येकमभिसम्बध्यते। गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां च धातूनां, तथा शब्दकर्मकाणामकर्मकानां च अण्यन्तानां यः कर्ता, स ण्यन्तानां कर्मसञ्ज्ञो भवति। गच्छति माणवको ग्रामम्, गमयति माणवकं ग्रामम्। याति माणवको ग्रामम्, यापयति माणवकं ग्रामम्।

[६२] [4]गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः। (म.भा. १.३३५)

नयति भारं देवदत्तः, नाययति भारं देवदत्तेन। वहति भारं देवदत्तः, वाहयति भारं देवदत्तेन। (म. भा. १. ३३५)

[६३] [5]वहेरनियन्तृकर्तृकस्येति वक्तव्यम्। (म.भा. १. ३३७)

इह प्रतिषेधो मा भूत्, वहन्ति यवान् बलीवर्दाः, वाहयति यवान् बलीवर्दान् इति [6](म.भा. १.३३७)। [7]बुद्धिः–बुध्यते माणवको धर्मम्, बोधयति माणवकं धर्मम्। वेत्ति माणवको धर्मम्, वेदयति माणवकं धर्मम्[8]। प्रत्यवसानमभ्यवहारः। भुङ्क्ते माणवक ओदनम्, भोजयति माणवकमोदनम्। अश्नाति माणवक ओदनम्, आशयति माणवकमोदनम्।

[६४] [9]आदिखाद्योः प्रतिषेधो वक्तव्यः। (म.भा. १. ३३७)

अत्ति माणवक [10]ओदनम्, आदयते माणवकेन [10]ओदनम्। खादति माणवकः, खादयति माणवकेन।

[६५] भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः। (म.भा. १. ३३७)

भक्षयति [11]पिण्डीं देवदत्तः, [12]भक्षयति पिण्डीं देवदत्तेन इति। अहिंसार्थस्य इति किम्? भक्षयन्ति बलीवर्दाः सस्यम्, भक्षयन्ति बलीवर्दान् सस्यम्।

शब्दकर्मणाम्—अधीते माणवको वेदम्, अध्यापयति माणवकं वेदम्। पठति माणवको वेदम्। पाठयति माणवकं वेदम्। अकर्मकाणाम्–आस्ते देवदत्तः, आसयति देवदत्तम्। [13]शेते देवदत्तः, शाययति देवदत्तम्[14]। [15]एतेषामिति किम्? पचत्योदनं देवदत्तः, पाचयत्योदनं देवदत्तेन इति। अण्यन्तानाम् इति किम्? गमयति देवदत्तो यज्ञदत्तम्, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः॥

---

1. अत्र फ. 2. ब्रुविशासिगुणः इत्यधिकम् अ. क. ड., 3. च यत् सचते अ, यत् संवर्ध्यते ब. 4. गत्यर्थेषु.... देवदत्तेन नास्ति क. 5. वहेस्तु ड. 6. इति गत्यर्थाः इत्यधिकम् अ. 7. बुद्ध्यर्थाः अ. ड. 8. इति बुद्ध्यर्थाः इत्यधिकम् अ. 9. अदि° फ. ह. 10. ओदनम् नास्ति फ. 11. पिण्डं ड. 12. भक्षयते ड. 13. उदाहरणमिदं नास्ति फ. 14. इति अकर्मकार्थाः इत्यधिकम् क. 15. एषाम् अ. क.